International Journal of Sanskrit Research 2018; 4(6): 144-146

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(6): 144-146
© 2018 IJSR
www.anantaajournal.com
Received: 28-09-2018
Accepted: 29-10-2018

**Dr. Jyothirmayi**
PC, HOD. Dept. of Sanskrit,
Mount Carmel College
Autonomous, Bangalore,
Karnataka, India

**Correspondence**
**Dr. Jyothirmayi**
PC, HOD. Dept. of Sanskrit,
Mount Carmel College
Autonomous, Bangalore,
Karnataka, India

# प्रतिभा वाक्यार्थः- भर्तृहरेः आशयस्यास्य प्रसक्तिः अर्थमीमांसायाम्

**Dr. Jyothirmayi**

**सारांश:** वाक्यपदीये वाक्यकाण्डे विद्यमानस्य प्रतिभा वाक्यार्थः इति सिद्धान्तस्य गौरवः, आधुनिकभाषाशास्त्रमण्डलेऽपि अर्थमीमांसायां (in Semantics) तस्य प्रसक्तिश्च दर्शयितुं लेखनेनानेन प्रयासः कृतः। वाक्यकाण्डकारिकाणां व्याख्यानम् अथवा प्रतिभाभेदानां विशकलनं च अत्र नोद्दिष्टम्।

**कुट शब्द:** भर्तृहरेः, आशयस्यास्य प्रसक्तिः, अर्थमीमांसायाम्

## प्रस्तावना

भाषया कथम् आशयविनिमयः क्रियते, भाषाश्रवणेन अर्थबोधः कथं जायते, शब्दस्यार्थः कः इत्यादिविषयेषु चिन्तोद्दीपिका परिचर्चा वाक्यकाण्डे विद्यते। 'अर्थः' इत्युक्ते कः' इति न केवलम् आधुनिकभाषाविदग्धाः अपि तु 'Artificial Intelligence, Natural Language Processing, Cognitive sciene इत्यादीनां शास्त्रशाखानाम् अभिज्ञाः अपि अन्विषन्ति। अर्थविचिन्तने आधुनिकचर्चाः पद-पदार्थतले सामान्यतया प्रचलन्ति। तत्र प्रामुख्येन 'referential theory', Ideational theory', 'truth-value theory इत्यादिभिः सिद्धान्तैः अर्थस्य रूपविषये चर्चाः प्रवर्तन्ते। पदतले तु बहुविधाः समस्याः विद्यन्ते ननु यथा वाक्यपदीये वाङ्मयमवलोकनं कृतम्- संसर्गः अर्थः, संसृष्टः अर्थः, जातिस्त्वर्थः, व्यक्तिरर्थः, जातिविशिष्टव्यक्तिस्त्वर्थः,व्यष्टिर्वा समष्टिर्वा पदार्थः (बिन्दौ च समुदाये च वाचकः सलिलादिषु)- पदं पदार्थद्वारा समग्रं वस्तु न निर्दिशति[i] यथा मधुपदेन मधोः माधुर्यं न ज्ञायते- वादानामेतेषां अन्यतमस्य स्वीकारेऽपि पद-पदार्थतले अव्याप्ति-अतिव्याप्ति दोषाः विद्यन्ते एव।

इत्थं भाषया आशयविनिमयः कथमिति सम्यगवलोकनं कृत्वा मत-मतान्तरानुपस्थाप्य अखण्डवाक्यसिद्धान्तं वाक्यकाण्डे प्रथमं प्रतिष्ठापयति भर्तृहरिः। सुप्रतिष्ठिते सति वाक्याखण्डत्वे,प्रतिभा वाक्यार्थः इति प्रतिभासिद्धान्तं च प्रस्तौति। -

प्रतिभा वाक्यार्थः

विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते।
वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम्॥

श्रोतृपक्षे भाषाश्रवणसमये, भाषायाः सक्रमश्रवणे –पदानां सक्रमस्वीकरणे पदार्थाः विच्छेदेन भासेत, तथापि ऐकार्थस्य पूर्णवाक्यस्यैव अर्थबोधः बुद्धौ प्रतिभाति – तदेव भानं-प्रतिभानं – अर्थः, प्रतिभा एव अर्थः- इति यावत्।

वाक्यकाण्डस्य अखण्डवाक्यसिद्धान्तः प्रतिभासिद्धान्तश्च भाषायाः आशयविनिमयव्यवस्थां सम्यक् समर्थयति।अत्रेदानीं अर्थविचिन्तने पद-वाक्यादिघटनां तिरस्कृत्य 'भाषा' (language) इति आशयविनिमयोपाधिरूपा इति स्वीकुर्मः। भाषायाः वास्तविकः रूपः कः? संस्कृत-मलयालादिवैविध्यं तु बाह्यवेषविधानभेद एव। वास्तविकरूपः कः इति विषये शास्त्रेण स्वीकृतं यत् वाचां अवस्थात्रयं चतुष्टयम्वा – वक्तृपक्षे, परा-पश्यन्ती-मध्यमा-वैखरीरूपा वाक् [ii], श्रोतृपक्षे वैखरी-मध्यमा-पश्यन्ती-परा इति। वक्तृपक्षे आशयस्य आविष्कारः वाचा सम्भवति, श्रोतृपक्षे वैखर्या बुद्धौ यत् प्रतिभाति तदर्थः इति।

वाचःशब्दस्य च लक्षणं – अर्थमीमांसायां प्रसक्तिश्च-

उच्यते इति वाक्, श्रूयते इति शब्दः -

उच्यते इत्यस्यैव 'वाक्' – 'वाक्' च वागिति उच्चारणस्थानादिद्वारा प्रवृत्तमानस्य कर्मेन्द्रियस्य 'उत्पन्नम्' । शब्दस्तु श्रोत्रस्य -ज्ञानेन्द्रियस्य 'विषयः'। व्यक्त्यधिष्ठितं यदा अवलोक्यते, वाक् शब्दश्च प्रत्येकं भिन्नम् (एकस्यां व्यक्तौ)। वक्तुः वाक्, श्रोतुः शब्दः एतदुभयं बुद्धौ एव सम्मिलति यच्च विना भाषायाः प्रवृत्तिः असाध्या [iii] । शब्दः अर्थस्य निमित्तकारणं श्रोतृपक्षे, निमित्तकारणेन फलप्राप्त्यर्थं कोऽपि वृत्तिः function अपेक्षिता- सा वृत्तिः - शब्दश्रवणेन एकार्थस्य झटिति भानम्- एवंरूपा वृत्तिः अर्थः [iv] इति यावत्।

एकार्थस्य शब्दैककस्य (speech unit – word, sentence, paragraph or an entire discourse which shares single purpose) पदस्फोटवाक्यस्फोट, भाषणस्फोट [v]वा प्रतिभायाः निमित्तं भवति। उदाहरणार्थं 'जन्मगेहम्' इति पदविषये चिन्तयामः। यस्य सदा 'जन्मगेहं' मधुरस्मृतिं जनयति तस्य तत्पदग्रहणे प्रतिभा –मोहनार्थप्रकाशिका। यस्य 'जन्मगेहं' दुरितपूर्णस्मृतिं जनयति तस्य मनसि अर्थबोधः दुःखस्मृतिदायिका च स्यात् [vi]। एवं प्रतिभा अभ्यासानुसारी [vii]। स्मृतिपथे – यस्य यस्य अनुभवस्य यथा यथा अनुभूतिः तस्य तस्य स्फुरणम् पुनस्सम्भवति, निमित्ते सति। अत एव उक्तं

वक्रान्यथैवप्रक्रान्तोभिन्नेषूपपत्तृषु
स्वप्रत्ययानुसारेणशब्दार्थाः प्रविभज्यते॥ (२-१३५)

अथवा शब्दस्फोटः स्मृतिमण्डले यस्य स्फुरणं जनयति तदेव प्रतिभा, शब्दस्यार्थः इति यावत्। [viii] [Sphota prompts Pratibha in the smriti, where sphota = language unit, pratibha = meaning, smriti = storage space of memories of experiences]

एवं तर्हि एकैकस्य स्मृतिमण्डले स्मृतिरूपं अनुभवज्ञानं यदस्ति, तदनुसृत्य एव तस्य मनसि ततःपरस्य अर्थावबोधः सम्भवति इति वक्तुं शक्यते। तदेव कारणं श्लोकस्यैकस्यापि व्याख्यानानां बाहुल्यस्य [ix]।

**प्रतिभा भाषार्थः**

प्रतिभा वाक्यार्थः इत्यनेन प्रतिभा भाषायाः अर्थः इत्यपि सिद्धम् यतः वाक्यं भाषणस्य एककमिति वाक्याखण्डसिद्धान्तस्य विलम्बरः। प्रतिभायाः षाड्विध्यमपि प्रतिभा अर्थः इत्यत्र अन्तर्लीनमस्ति यथा-

स्वभावचरणाभ्यासयोगादृष्टोपपादिताम् ।
विशिष्टोपहितां चेति प्रतिभां षड्विधां विदुः ॥ 2-152

स्वभावसिद्धा प्रतिभा (प्रकृतेः महत्तत्वरूपेण परिणामः/ सुषुप्त्यवस्थास्थितस्य जाग्रदवस्थाप्राप्तिः); चरणसिद्धा प्रतिभा- (शास्त्रविहिततपस्स्वाध्यायादिना सदाचारेण वसिष्ठादीनांत्रैकालिकविषयप्रकाशः); अभ्याससिद्धा प्रतिभा- (कूपखनकानां कुत्र जलं वर्तते इति ज्ञानम्); योगसिद्धा प्रतिभा (योगाभ्यासवशेन इतरेषाम् अभिप्रायग्रहणशक्तिः); अदृष्टसिद्धा प्रतिभा, सिद्धिसंपन्नविशिष्टव्यक्तिभिःसंक्रामिता प्रतिभा (उदाहरणम्- संजयस्य दूरस्थितभारतयुद्धसमाचारग्रहणशक्तिः कृष्णद्वैपायनेन संक्रामिता) – एवं वैविध्यं तु केवलं निमित्तभेदसूचकम्- सर्वत्र प्रतिभा एव अर्थः – स्फोटः

(श्रुतभाषायाः एककं) स्मृतिमण्डले (अनुभवानां भण्डारे) प्रतिभां (अर्थस्य प्रतिभानम्) जनयति।

## वाक्यकाण्डस्य व्यावहारिकत्वम्

भाषा इत्यस्याः व्यवस्थायाः आशयविनिमयसामर्थ्यं कथमित्युक्ते भर्तृहरिणा निरीक्षितं यत् लोकस्य शब्दानुविद्धत्वम्। यत् किमपि वस्तुः क्रिया, अनुभवः वा भवतु नाम, तत्सर्वं शब्देनैव सूचितं भवति। यथा- 'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते'। या कापि भाषा वा भवतु, शब्दस्य (श्रवणेन्द्रियस्य विषयस्य)वाचः (वागिन्द्रियस्य उत्पन्नस्य) च मेलनं प्रत्येकस्य व्यक्तेः बुद्धौ एव सम्भवति, तद्विना भाषायाः प्रवृत्तिरसाध्या। अत्रापि सदा भाषया, सिद्धस्य साध्यस्य वा क्रियाकलापस्य विवरणत्वेन लोकज्ञानस्य आविष्कारः सम्भवति। (world of actions through words of actions)| क्रियायां अर्थानुसारं यथा यथा नामपदानि कारकानुसृतानि युक्तानि भवन्ति तथा तथा वाक्यघटना (syntax) सज्जा सिद्धा प्रसिद्धा च भवति विविधासु भाषासु। वाक्यघटनायाः अपि अधिष्ठानं तु वाक्यार्थः एव। वाक्यार्थः प्रतिभा।

एवं वाक्यपदीयस्य प्रथमे ब्रह्मकाण्डे भाषायाः आध्यात्मिकतलं, द्वितीये वाक्यकाण्डे व्यावहारिकतलं तृतीये पदकाण्डे विशकलनात्मकं (Analytical Study of Language) च अवलोकनम् कृतमिति ज्ञायते। वाक्यकाण्डे भाषा का, अर्थः कः इत्यादि विषयेषु व्यवहारतले उपकारकाणि सर्वभाषाश्लेषकानि (न केवलं संस्कृतसम्बद्धः अपि तु भाषाशास्त्रसंबद्धः) तत्वरत्नानि विद्यन्ते।

### References


1. Vakyapadiyam Part II (Vakyakanda) Of Bhartrhari with the commentary Ambakartri by PanditRaghunathaSarma, Varanasi, Sampurnananda Samskrita Viswavidyaalaya, 1968, 91, Second Edition, 1980.
2. Bhashartham. (Malayalam), VenugopalaPanicker, Kerala Bhasha Institute, 1997.
3. A study in language and Meaning: A critical examination of some aspects of Indian Semantics, Bishnupada Bhattacharya.
4. Semantic Knowledge and Semantic Representations: A Special Issue of Memory, (edited by) Rosaleen A. McCarthy, Psychology Press, 1995.


---

[i]दुर्लभंकस्यचिल्लोके
सर्वावयवदर्शनम्।
कैश्चित्ववयवैर्दृष्टै-
र्थःकृत्स्नोऽनुमीयते॥ २-१६१भाषायाः परिमितिः limited meaning- limitation of language

[ii]परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।

[iii] It is also important to note that 'sabda' and 'vak' are different with respect to any particular individual and they do get a common place for sharing, in the inner faculty - in the intellect, without which language does not work.

[iv]meaning is a function of sabda

[v]When the entire discourse is considered as a speech unit, it can be considered as पूर्णभाषणस्फोट (this word is not used in Vakyapadiya) which leads to a sudden flash of understanding – the gist of the discourse that is flashed in the listener's mind is the meaning, pratibha.

[vi]

[vii]अभ्यासात् प्रतिभाहेतुः शब्दः सर्वो'परैः स्मृतः ।
बालानां च तिरश्चां च यथार्थप्रतिपादने ॥
अपरैः आचार्यैः सर्वः ध्वन्यात्मकः वर्णात्मकःपदवाक्यरूपश्च शब्दः
अभ्यासात् पुनःपुनरावृत्या प्रतिभाहेतुः नियतार्थहेतुः भूत्वाकार्यप्रवृत्तौ कारणं भवति इति स्मृतः ।

[viii]'Sphota' prompts 'pratibha' in the 'smriti' – where sphota is unit of language, pratibha is the meaning, smriti is the storage space of memories of experiences

[ix] भगवद्गीतायाः असंख्यानि व्याख्यानानि उपलभ्यन्ते- बुद्धिविचक्षणैरेव विरचितानि, उदाहरणाय - श्रीशङ्करस्य भाष्यम्, ज्ञानेश्वरस्य, बालगङ्गाधरतिलकस्य, विनोबामहाशयस्य, स्वामि रङ्गनाथानन्दस्य, चिन्मयानन्दस्वामिनः, भक्तिवेदान्तप्रभुस्वामिनः इत्यादि।